International Journal for Multidisciplinary Research (IJFMR)
E-ISSN: 2582-2160 ● Website: www.ijfmr.com ● Email: editor@ijfmr.com

# वैज्ञानिकदृष्ट्या अबन्न विचार

## Science in the Vedas

S P Tejaswi

Assistant professor, Sri Satya Sai University for Human Excellence

यदि परमाणुः समस्तं जगत् सृजति तर्हि तस्मिन् सृष्टौ सर्वे प्राणिनः परमाणुनिर्मिताः भवन्ति। तस्य प्रथमपरमाणुस्थ मूलगुणाः एव सर्वेषां प्राणिनां अणुषु समाहिताः सन्ति। भौतिकशास्त्रं, सामग्रीशास्त्रं, रसायनशास्त्रं च एतत् स्वीकुर्वन्ति। अद्यतन समाजः एतानि विज्ञानानि सत्यानि इति मन्यते। शोभन प्रथमं जापानी वैज्ञानिकेन आविष्कृतानि कानिचन आश्चर्यकारकाणि विषयाणि ज्ञास्यामः।

**डॉ. मसारू इमोटो महोदयः**

स्वस्य शोधस्य माध्यमेन सः ज्ञातवान् यत् मानवस्य वाक्, गायनस्य, नृत्यस्य च शब्दाः जलं -भोजनं च प्रभवन्ति इति। केचन जलबिन्दवः गृहीत्वा तेषां पुरतः पृथक् पृथक् रूपेण शुभसूचकवाक्यानि, सुप्रार्थनाः, सुसङ्गीतं, सुसरलनृत्यवाक्यानि, वेदपाठनं च जपन्ति स्म। अपि च पृथक् स्थापित जलबिन्दूनां पुरतः केचन दुष्टाः / तीव्रशब्दाः, धातुसङ्गीतम् तीव्रनृत्यध्वनयः श्राविताः। कानिचनदिनानन्तरं हिमघटवत् जलबिन्दवः सूक्ष्मदर्शकेन अवलोक्य तेषां चित्राणि गृहीताः।

जलं अनेकानाम् अणुनां संग्रहः अस्ति। शुभशब्दाः, शुभप्रार्थनाः, वेदपाठनं, उत्तमं संगीतं श्रुतवत जलबिन्दुस्फटिकेषु अणुसंग्रहस्य आकारः अतीव सुन्दरः दृष्टः तथा च मौक्तिकराशिः इव दृश्यते; तीव्रशब्दाः, तीव्रसङ्गीतध्वतिः श्रुतवतजलबिन्दुस्फटिकेषु परमाणु सङ्गहस्य आकारः अरुचिकरः, अव्यवस्थितः दृष्टः ।

छायाचित्रेषु अपि द्रष्टुं शक्यते



वैज्ञानिकः अवदत् यत् मानवाशरीरस्य 72 प्रतिशतं भागं जलमस्ति। यदि केवलं कतिपयानि जलबिन्दवः वेदपठनं, सद्वचनानि, सुसंगीतं श्रुत्वा तेषां जलबिन्दूनां अणुसंरचना सुन्दरं निर्मीयते तर्हि 72 प्रतिशतं जलस्थापकः पुरुषः स्वयमेव सद्वचनं, सत्पठनं, सुशब्दानां श्रवणं, सर्वदा सत्यवदनं यदि आचरति तदा किमुवक्तव्यं फलविषये। एताद्दशरूपाचरणं यः करोति सः शारीरकरूपेण, मानसिकरूपेण च द्दढतया, अतीव स्वस्थश्च भविष्यति। ताद्दशभावनाविरुद्धः पुरुषः शारीरकतयामानसिकतया च अद्दढः, अस्वस्थः भवति । एतत् वैद्यभाषायां **"मनः सर्वेषां रोगानाम् उत्पत्तिः"** "Mind is the Origin of all diseases" इति कथ्यते।

तथैव अन्यस्मिन् आहारप्रयोगे वायुरोधक काचपुटद्वयं शुक्लतण्डुलैः सह पूरयित्वा पृथक्-पृथक् प्रकोष्टेषु एकमासपर्यन्तं संस्थाप्य, प्रतिदितनं उप पुटं गत्वा प्रथमपुट पुरतः प्रीतिवाक्यानि एवं द्वितीयपुट पुरतः द्वेषभूयिष्ट, अशुद्धवाक्यानि पञ्चदश निमेषकालं यावत् भाषयति स्म। एकमासानन्तरं यदा द्दष्टः तदा विचित्रः अनुभवः जातः यथा प्रीतिवाक्यानि श्रुत शुक्लतण्डुलाः तथैवासन् एवं दुष्टवाक्यश्रुततण्डुलाः कृष्णाः भूत्वा दूषिताः सञ्जातः। अर्थात् अस्माकं व्यवहारः भोजने कथं प्रभावं करोतीति प्रयोगेन एते मसारू डमोटो वैज्ञानिकः नूतनतया आविष्कृतः। तेन च अस्माकं व्यवहार : सात्विकरूपेणैव भवितत्यं इति निरूपितः [1]।

परन्तु अमुमेव विषयं वेदाः पूर्वमेव प्रतिपादितः। सामवेदान्तर्गत छान्दोग्योपनिषदि षष्ठाध्याये पचमखण्डे **"अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुः तत् पुरीषं भवति यः मध्यमः तन्मांसं यः अणिष्ठः तन्मनः।"**[2] इति अन्नस्य त्रैविध्य परिणामः सुस्पष्टतया प्रतिपादितः।

अर्थात् भुज्यमान आहारः त्रिधा विभज्यते स्थूलः, मध्यमः, सूक्ष्मः इति। तत्र स्थूलरूपान्नं पुरीषं भवति, मध्यमस्थानमन्नं रसादिक्रमेण परिणम्य मांसं त्वक् भवति, यः अणिष्ठः सूक्ष्मः सः वागादिकारणसंघातस्य स्थितिमुत्पादयन् मनो रूपेण परिणमति। सात्विकाहार सेवने सात्विकमनः, राजसिकाहार सेवने तदनुगुण मनः, तमोगुणाहार सेवने तमोगुण भूयिष्ट मनः भवति। आहारविषयकज्ञानं भगवद्गीतायां श्रद्धात्रयविभागायोगे सप्तमश्लोकादारभ्य दशमश्लोकं यावत् सुस्पष्टतया "भगवान् कृष्णः अस्मान् उपदिष्टावन्तः। एवमेव जलविषयेपि छान्दोग्ये परिणाम प्रकारत्रयं द्दश्यते – **"आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुः तन्मूत्रं भवति यः मध्यमः तल्लोहितं भवति यः अणिष्ठः सः प्राणः"**[3] इति। उच्यते **"आपोमयः प्राणः न पिबतो विच्छेत्स्यते"**[4] इति। तेजसस्य[5] घृतादि रूपाहारस्यापि प्रकार भेदः द्दश्यते। एवं अन्नस्य मनोरूपेण परिणामविषये प्रयोगोपि[6] आरुणिः श्र्वेतकेतुद्वारा निरूपितः। अनेन ज्ञायते वेदे पूर्वमेव विद्यमान वैज्ञानिक विषयाः अधुना नूतनतया आविष्कृताः इति भान्ति वैज्ञानिकाः।

अथ इदानीं सत्वबुध्याहारेण सात्विक मनसा प्रयोजनं पश्यामः। छान्दोग्ये नारद - सनत्कुमार संवादे सप्तमाध्याये षड्विंशतितमे ज्ञायते -

[1] English edition: the message from water. Vol 2.
Water crystal healing : music & images to restore your well being. Newyork;Hillsboro.

[2] छान्दोग्योपनिषत् (6/5/1)

[3] छान्दोग्योपनिषत् (6/5/2)

[4] छान्दोग्योपनिषत् (6/7/1)

[5] छान्दोग्योपनिषत् (6/5/3)

[6] छान्दोग्योपनिषत् (6/7/1)- छान्दोग्योपनिषत् (6/7/6)

"**अहारशुदौ सत्वशुद्धिः, सत्वशुद्धौ ध्रुवा स्मृतिः स्मृति लम्भे सर्वग्रथीनां विप्रमोक्षः**"[7] इति।

आह्रियतेत्याहार: न केवलं तण्डुलाः अत्र आहार शब्देनोच्यते अपितु शब्दादि विषयाः । एतेषां शब्दादि विषायाणां शुद्धे सति रागद्वेषमोहदोषैरसंसृष्टविज्ञानं प्राप्यते। तेन सत्वस्य अन्तःकरणस्य शुद्धि: नैर्मल्यं; तेन च आत्मनि अविस्मरण स्मृतिः; ततश्च सर्वेषां अविद्याकृत अनर्थपाशरूपाणां दुःखानां विनाश: सम्भवति ।

तेन च सः पुरुषः "**ब्रह्म विदाप्नोति परम्**"[8] इत्युक्तरीत्या परं प्राप्नोति।

[7] छान्दोग्योपनिषत् (7/26/2)

[8] तैत्तिरीयोपनिषत् (2/1/1)